International Journal of Multidisciplinary Research and Development

IJMRD 2015; 2(2):199-200
www.allsubjectjournal.com
Received: 11-01-2015
Accepted: 08-02-2015
E-ISSN: 2349-4182
P-ISSN: 2349-5979
Impact factor: 3.762

**बृजभूषण शर्मा**
शोधच्छात्रः J.R.F.)
राजस्थानविश्वविद्यालयः
जयपुरम् (राजस्थानम्) भारत

**Correspondence:**
**बृजभूषण शर्मा**
शोधच्छात्रः J.R.F.)
राजस्थानविश्वविद्यालयः
जयपुरम् (राजस्थानम्) भारत

# "अचः परिस्मिन्पूर्वविधौ"

**बृजभूषण शर्मा**

अथ शतकोटिपाणिप्रभृतिनिगदितव्याकरणेषु त्रिमुनिप्रणीतं व्याकरणं सर्वज्ञसकलशास्त्रयथार्थमर्मज्ञमहर्षिप्रकाशितं वेदार्थपरिज्ञानप्रयोजनमज्ञानकर्दम– कलुषितजनवाणीपरिशोधने कतकबीजायते एतादृशेऽस्मिन् व्याकरणशास्त्रे पाणिनिविरचिताष्टाध्याय्याः प्रथमाध्यायस्य प्रथमपादस्य सप्तपञ्चाशत्तममिदं सूत्रं ''अचः परिस्मिन्पूर्वविधौ'' (1–1–47) इति। अचः, परस्मिन्, पूर्वविधौ इति पदविभागः। त्रिपदात्मकं सूत्रमिदम्। "स्थानिवदादेशोऽनल्विधौ" 1–1–56 इति सूत्रात् स्थानिवत्, आदेशः इति पदद्वयमनुवर्तते। स्थानिवत्सूत्रे "अनल्विधौ" इति निषेधेन अल्विधौ स्थानिवद्भावेऽप्राप्ते तद्विध्यर्थं सूत्रमिदम्। अत्र सूत्रे पूर्वविधौ इत्यत्र पूर्वस्य विधिः, पूर्वस्माद्विधिरिति द्विधा विग्रहः स्वीक्रियते। तथा च परनिमित्तोऽजादेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन यो दृष्टः तस्य तस्माद्वा निमित्तभूतविधौ कर्तव्ये इति सूत्रार्थः सिद्ध्यति।

**पूर्वविधावित्यत्र षष्ठीतत्पुरुषे प्रयोजनविचारः**
षष्ठीतत्पुरुषे उदाहरणम् – वव्रश्च। ओव्रश्चू छेदने इति धातोः लिटि, तिपि, णलि, द्वित्वे व्रश्च अ व्रश्च् अ इति दशायां "लिट्यभ्यासस्योभयेषाम्" 6–1–17 इति अभ्यासे रेफस्य सम्प्रसारणे, हलादिशेषे, वृ अ व्रश्च् अ इति दशायाम् "उरत्" 7–5–66 इति सूत्रेण अभ्यासे ऋकारस्य स्थाने अकारादेशे रपरत्वे पुनः हलादिशेषे रलोपे कृते 'वव्रश्च' इति सिध्यति। अत्र अभ्यासे वकारस्य सम्प्रसारणन्तु न प्रवर्तते। "उरत्" 7–5–66 इति सूत्रेण विहितस्याकरस्य प्रकृतसूत्रेण स्थानिवत्त्वेन संप्रसारणत्त्वात् "न संप्रसारणे संप्रसारणम्" 6–1–37 इति निषेधात्। एवञ्च पूर्वस्य विधिः पूर्वविधिः इति षष्ठीतत्पुरुषसमासे वव्रश्चेति उदाहरणम्।

**पूर्वविधावित्यत्र पंचमीतत्पुरुषे प्रयोजनविचार:**
पूर्वस्माद्विधिः पूर्वविधिरिति पंचमीतत्पुरुषस्योदाहरणम् – तन्वन्ति। अत्र तनु विस्तारे इत्यस्माद्धातोर्लटि 'झि' आदेशे, अन्तादेशे च तन् + अन्ति इति दशायां "सार्वधातुकमपित्" 1–2–4 इति अन्तादेशस्य ङित्वेन "क्ङिति च" 1–1–5 इति निषेधात् उकारस्य स्थाने "सार्वधातुकार्धधातुकयोः" 7–3–84 इति गुणाभावे "इको यणचि" 6–1–77 इति यणादेशे च – तन्वन्ति इति रूपम्। अत्र वकारस्य "आर्धधातुकस्येड्वलादेः" 7–2–35 इति प्राप्तः इडागमः यणादेशस्य स्थानिवद्भावात् वार्यते।

**सूत्रेऽज्ग्रहणप्रयोजनविचारः**
सूत्रे 'अचः' इत्युक्त्या विश्नः, प्रश्नः इत्यादौ तुगागमो वार्यते। अन्यथा 'विच्छ' धातोः "यजयाचयतविच्छप्रच्छरक्षो नङ्" 3–3–10 इति नङ् प्रत्यये विच्छ अ न इति दशायां "च्छ्वोः शूडनुनासिके च" 6–4–19 इति सूत्रेण 'छ' कारस्य स्थाने जातस्य शकारस्य परनिमित्तकत्वेन स्थानिवत्वेन "छे च" 6–1–73 इति सूत्रेण तुगागमापत्तिः। अतस्तद्वारणार्थं प्रकृतसूत्रे 'अचः' इत्युक्तम्।

**सूत्रे परस्मिन्निति पदग्रहणप्रयोजनविचारः**
सूत्रे 'परस्मिन्' इति कथनेन 'युवजानिः' इत्यत्र "लोपो व्योर्वलि" 6–1–66 इति यकारलोपः सिध्यति। अन्यथा "अचः पूर्वविधौ" इत्येव सूत्रं स्यात् तर्हि युवतिः जाया यस्य स इत्यर्थे युवतिशब्दस्य पुंवद्भावे नलोपे च "जायाया निङ्" 5–4–134 इति सूत्रेण आकारस्य स्थाने निङादेशे युवजाय् + नि इति दशायां निङादेशस्य अच्स्थानिकत्वेन "लोपो व्योर्वलि" 6–1–66 इति पूर्वविधौ यलोपे कर्तव्ये अच्त्वबुद्ध्या वल्परकत्वाभावात् यलोपानापत्तिः। अतस्तत्सिद्ध्यर्थं सूत्रे 'परस्मिन्' इत्युक्तम्। तथा च निङादेशस्य परनिमित्तकत्वाभावेन स्थानिवद्भावाभावान्निरुक्तदोषो वार्यते।

**सूत्रे पूर्वविधाविति पदप्रयोजनविचारः**
'पूर्वविधौ' इति कथनेन नैधेयः इत्यत्र दोषो वार्यते। तथा हि–नि पूर्वात् 'धा' धातोः ''उपसर्गे घोः किः'' 3–3–92 इति किप्रत्यये ककारानुबन्धलोपे ''आतो लोप इटि च'' 6–4–64 इत्याकारलोपे निधिशब्दस्य द्व्यच्त्वमादाय ''इतश्चानिञः'' 4–1–122 इति ढक् प्रत्ययः सिध्यति। प्रकृतसूत्रे पूर्वविधौ इत्यस्याभावे आकारलोपस्य स्थानिवद्भावे प्रातिपदकस्य त्र्यच्कत्वेन द्व्यच्कत्वाभावात् पूर्वोक्तः ढक् प्रत्ययो न स्यात्। अतस्तत्सिद्ध्यर्थम् अत्र सूत्रे 'पूर्वविधौ' इति वक्तव्यम्। तेनात्र कस्यापि पूर्वविधेरभावात् स्थानिवद्भावाप्रवृत्त्या पूर्वोक्तदोषो वार्यते।

**अत्र शंका**
सूत्रेऽस्मिन् 'विधि'ग्रहणं मास्तु। "अचः परस्मिन्पूर्वस्य" इत्येव सूत्रं पठ्यताम्। एवंच पूर्वस्य कार्ये कर्तव्ये इत्यर्थलाभात् विधिग्रहणं व्यर्थमेव – इति।

**अत्र समाधानम्**
पूर्वस्य विधिः, पूर्वस्माद्विधिरिति समासद्वयलाभार्थं सूत्रे विधिग्रहणमावश्यकम् – इति।

**पूर्वविधावित्यत्र पंचमीतत्पुरुषे दोषप्रदर्शनम्**
पूर्वविधावित्यत्र पंचमीसमासः यद्याश्रीयते तर्हि 'विगणय्य' इति रूपं न सिध्येत्। तथा हि – विपूर्वकात् गण संख्याने इत्यस्माद्धातोः णिचि, ततः क्त्वा प्रत्यये "समासेऽनञ्पूर्वे क्त्वो ल्यप्" 7–1–37 इति क्त्वः स्थाने ल्यबादेशे "अतो लोपः"

6–4–48 इति अकारलोपे विगण् इ य इति दशायां "ल्यपि लघुपूर्वात्" 6–4–46 इति सूत्रेण णिचः अयादेशे विगण् + अय् + य = विगणय्य इत्यभीष्टं रूपम्। किन्तु अत्र सूत्रे यदि पंचमीसमासः आश्रीयते तर्हि अल्लोपस्य स्थानिवद्भावेन लघुपूर्वत्वाभावात् णेः अयादेशो न स्यात्। आरम्भसामर्थ्यात् स प्रवर्तत इति वक्तुं तु न शक्यते। अनुगमय्य इत्यादौ मित्सु सूत्रस्य चरितार्थत्वात्। एवञ्च पूर्वोक्तरीत्या पंचमीतत्पुरुषाश्रयणेऽत्र दोषस्तदवस्थ एव – इति।

## पूर्वोक्तदोषवारणप्रदर्शनम्

पूर्वस्माद्विधौ स्थानिवद्भावः न नित्यः। अत्र च "निष्ठायां सेटि" 6–4–52 इति सूत्रं प्रमाणम्। तथा हि – तत्र सूत्रे 'सेटि' इति पदम् अनिटि व्यावृत्त्यर्थन्तु न। णिजन्ताद्धातोः अनिट्त्वासम्भवात्। एवञ्च कालावधारणार्थं सेड्ग्रहणम्। इटि कृते एव णिलोपः न तु ततः प्रागिति तदर्थः। अन्यथा कारितमित्यादौ 'णेरनिटि' 6–4–51 इति णिलोपे कृते "एकाच उपदेशेऽनुदात्तात्" 7–2–10 इति इण्निषेधः स्यादिति तद्वारणार्थं 'सेटि' इत्युक्तम्। पूर्वस्माद्विधौ स्थानिवत्त्वे तु णिचा व्यवधानेन निषेधो न प्राप्नोत्येव। तस्मादत्र सेड्ग्रहणं पंचमीसमासस्यानित्यतां ज्ञापयति। अत एव 'अन्तः' 8–4–20 इति सूत्रव्याख्यावसरे हरदत्तेनोक्तम् – अनित्यः पूर्वस्माद्विधो स्थानिवद्भावः "निष्ठायां सेटि" इति सेड्ग्रहणात् – इति। एवं च विगणय्य इत्यादौ नास्ति कश्चिद् दोषः।

## अत्र केचित्

'पूर्वविधौ' इत्यत्र पंचमीसमासस्य बेभिदिता, माथितिकः, अपीपचन् इति प्रयोजनत्रयं प्रदर्शितं भाष्ये। किन्तु तत्प्रयोजनानामन्यथासिद्धत्वात् पंचमीसमासः अनावश्यक एव। एवं स्थिते पंचमीसमासस्य पूर्वोक्तं 'तन्वन्ति' इत्युदाहरणप्रदर्शनं तु हरदत्तमतरीत्या न तु सिद्धान्तरीत्या। अतो नास्ति कश्चिद् दोष इत्याहुः।

## 'विधि' ग्रहणप्रयोजनविचारः

सूत्रेऽस्मिन् विधिग्रहणं मास्तु। "अचः परस्मिन् पूर्वस्य" इत्येवोच्यताम् + तत्र षष्ठीविभक्तिः सम्बन्धसामान्ये। सम्बन्धश्च (1) कार्यित्वेन, (2) निमित्तत्वेन वा। तथा च सूत्रे विधिग्रहणं विनैव समासद्वयलाभसम्भवादनावश्यकमेव विधिग्रहणम् इत्याक्षेपः।

## अत्र समाधानम्

पूर्वोक्तरीत्यैव सिद्धे सूत्रे विधिग्रहणं योगविभागार्थम्। तेन पूर्वस्य विधौ स्थानिवदेव इति नियमात् स्वाश्रयं कार्यं न प्रवर्तते। अथवा योगविभागो न स्वीक्रियते। विधिग्रहणसामर्थ्यात् विधिमात्रे स्थानिवद्भावः भविष्यति शास्त्रीये अशास्त्रीय च। अत एव पटयतीत्यादौ वृद्ध्यभावः सिध्यति। एवं तर्हि स्थानिवत्सूत्रादेव विधिग्रहणस्यानुवृत्तिः सम्भवतीति तु नाशंकनीयम्। पुनर्विधिग्रहणेन पूर्वस्यैव विधौ स्थानिवद्भावः न तु पूर्वपरयोः विधाविति लभ्यते। तेन 'ईयतुः' इति रूपं सिद्ध्यति। अन्यथा 'इण्' धातोर्लिटि तसि, अतुसादेशे ई + अतुस् इति दशायाम् "इणो यण्" 6–4–81 इति यणादेशे "द्विर्वचनेऽचि" 1–1–59 इति यणादेशस्य रूपातिदेशात् द्वित्वे कृते ई + ई + अतुस् दशायां वर्णमात्रानिमित्तकत्वेन अन्तरंगत्वात् सवर्णदीर्घे 'ईतुः' इत्येव रूपं स्यात्। न तु ईयतुः इति। सूत्रेऽस्मिन् विधिग्रहणे कृते तु पूर्वोक्तरीत्या पूर्वस्यैव विधौ स्थानिवद्भावेन सवर्णदीर्घस्य तु पूर्वपरयोर्विधित्वेन स्थनिवद्भावाभावेन सवर्णदीर्घाप्रवृत्त्याऽभीष्टं रूपं सिध्यति। एवंच पूर्वस्यैव विधौ स्थानिवद्भावो न तु पूर्वपरयोर्विधाविति कथनार्थं सूत्रेऽस्मिन् विधिग्रहणमावश्यकमेव – इति।

## अत्र शंका

वैयाकरण इत्यादौ यकारादेः प्रकृतसूत्रेण स्थानिवद्भावेन अच्परत्वमाश्रित्य "एचोऽयवायावः" 6–1–78 इति आयादेशः प्राप्नोति – इति।

## अत्र समाधानम्

अस्मिन् सूत्रे स्थान्यादेशनिमित्तानां त्रयाणां संनिधानसम्भवेऽपि स्थान्यपेक्षमेव पूर्वत्वं गृह्यते, नत्वादेशापेक्षं, नापि निमित्तापेक्षम्। अत एव "अचः पूर्वत्वविज्ञानादैचोः सिद्धम्" इति भाष्योक्तं संगच्छते। अनादिष्टादचः पूर्वो यस्तस्य विधिं प्रत्येव स्थानिवद्भाव इति तदर्थः। वैयाकरण इत्यत्र ऐकारस्तु आदिष्टादचः पूर्वः। अतो न तत्र स्थानिवद्भाव इति अयादेशप्रसंगो नास्त्येव – इति।

## अत्रेदं बोध्यम्

स्थानिद्वारकमनादिष्टादचः पूर्वत्वाश्रयणं न नित्यं, किन्तु क्वाचित्कमेव। अत्र च "न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु" 1–1–58 इति सूत्रस्थं भाष्यं प्रमाणम्। तत्र हि 'यलोपे किमुदाहरणम्?' इत्याशंक्य 'कण्डूयतेः क्तिच्'। 'ब्राह्मणकण्डूतिः, क्षत्रियकण्डूतिः' इति समाहितम्। अयं भावः 'कण्डू' इत्यस्माद्धातोः 'कण्ड्वादिभ्यो यक्' 3–1–27 इति यक् प्रत्यये ककारस्यानुबन्धलोपे 'कण्डू + य' इति दशायां "क्तिच्क्तौ च संज्ञायाम्" 3–3–174 इति 'क्तिच्' प्रत्यये ककारचकारयोः अनुबन्धलोपे 'कण्डूय + ति' इति दशायाम् "अतो लोपः" 5–4–48 इत्यकारलोपे "लोपो व्योर्वलि" 6–1–66 इत्यलोपे च कण्डूतिः इति सिद्धयति। अत्र अल्लोपस्य स्थानिवत्त्वेन उकारस्य स्थाने "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" 6–4–77 इति उवङ् आदेशस्तु न प्रवर्तते। तस्मिन् कृतेऽपि "च्छ्वोः शूडनुनासिके च" 6–4–19 इति ऊठः सिद्धेः। ऊठि तु न स्थानिवत्त्वम्, अनादिष्टादचः पूर्वत्वाभावात्। अस्मादेव भाष्यप्रयोगात् स्थानिद्वारकम् अनादिष्टादचः पूर्वत्वाश्रयणम् अनित्यमिति ज्ञाप्यते – इति। न पदान्तसूत्रे उद्योतग्रन्थे सर्वमिदं स्पष्टम्।

अस्मिन् सूत्रेऽचः पूर्वत्वं नाम नाव्यवहितमेव किन्तु व्यवहितमेव किन्तु व्यवहितमपि। अत्र च "तस्मिन्निति निर्दिष्टे पूर्वस्य" 1–1–66 इति सूत्रे 'निर्दिष्ट' ग्रहणं ज्ञापकम्। तेन पठयति, अवधीत् इत्यादौ व्यवहितेऽपि प्रकृतसूत्रेण स्थानिवद्भावसिद्ध्या वृद्धिर्वार्यते।

एवं प्रकारेण खण्डन–मण्डन–पुरस्सरं सूत्रमिदं व्याख्यातुं शक्यते।

## सहायकग्रन्थसूची


1. अष्टाध्यायीकाशिकावृत्तिः, चौखम्भासंस्कृतप्रतिष्ठान, दिल्ली।
2. काशिकावृत्तिन्यासपदमञ्जरीयुता–षट् भागाः प्राच्यभारती प्रकाशनम्, वाराणसी, 1956–66।
3. काशिकावृत्तिसिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम्, डॉ. मोहनदत्त शर्मा, पूना, 1974।
4. प्रक्रियाकौमुदी (प्र.कौ.), के.पि. त्रिवेदिना सम्पादिता, मुम्बई, 1925।
5. प्रौढमनोरमा, श्रीभट्टोजिदीक्षितः, चौखम्भा कृष्णदास अकादमी, वाराणसी, संस्करणः पुनर्मुद्रित, वि.सं.2064ः
6. प्रौढमनोरमा शब्दरत्न–भैरवी–भावप्रकाशसरलोपेता, चौखम्भा, वाराणसी।
7. मध्यसिद्धान्तकौमुदी 'लक्ष्मी'– मुद्रिका' संस्कृत–हिन्दी व्याख्योपेता सरल सुबोध परिशिष्टादि सहिताच, चौखंभा ओरियन्टालिया, दिल्ली, 110007 (भारत)
8. महाभाष्यम् (म.भा.) भारतीयाद्यिशासनसंरक्षकतायां प्रकाशितम् भागत्रयात्मकम्, मोतीलाल बनारसीदास, 1967।
9. लघुशब्देन्दुशेखरः नागेशभट्टः चौखम्भा पब्लिशर्स, वाराणसी, संस्करण 2004।
10. शब्दकौस्तुभः प्रथमभागः, चौखम्भा, 1929।
11. शब्दकौस्तुभः, द्वितीयभागः, चौखम्भा, 1929।
12. सिद्धान्तकौमुदी तत्त्वबोधिन्या सह, (सि.कौ.त.) निर्णयसागरप्रकाशनम्, मुम्बई, 1936
13. सिद्धान्तकौमुदी, बालमनोरमतत्त्वबोधिनीयुता (सि.कौ.बा.त.) मोतीलाल बनारसीदास, देहली, 1964।
14. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, प्र.सं. 2007 (संवत्)।
15. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, द्वि.सं. 2020 (संवत्)।